# Shri Raghavendraguru Stotram

# श्रीराघवेन्द्रगुरुस्तोत्रम्

## Document Information

Text title : Shri Raghavendraguru Stotram

File name : rAghavendragurustotram.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : appaNAchArya

Transliterated by : Krishnananda Achar

Proofread by : Krishnananda Achar

Description/comments : PanchayatistutiH

Acknowledge-Permission: C Narayanarao

Latest update : August 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# श्रीराघवेन्द्रगुरुस्तोत्रम्

श्रीपूर्णबोधगुरुतीर्थपयोब्धिपारा
  कामारिमाक्षविषमाक्षशिरःस्पृशन्ती ।
पूर्वोत्तरामिततरङ्गचरत्सुहंसा
  देवालिसेवितपदाम्फ्रिपयोजलग्ना ॥ १॥

जीवेशभेदगुणपूर्तिजगत्सुसत्वा
  नीचोच्छभावमुखनक्रगणैः समेता ।
दुर्वाद्यजापतिगिलैर्गुरुराघवेन्द्र
  वाग्देवतासरिदमुं विमलीकरोतु ॥ २॥

श्रीराघवेन्द्रः सकलप्रदाता
  स्वपादकञ्जद्वयभक्तिमद्भ्यः ।
अघाद्रिसम्भेदनदृष्टिवज्रः
  क्षमासुरेन्द्रोवतु मां सदायम् ॥ ३॥

श्रीराघवेन्द्रोहरिपादकञ्ज-
  निषेवणाल्लब्ध समस्तसम्पत् ।
देवस्वभावो दिविजद्रुमोयं
  इष्टप्रदो मे सततं स भूयात् ॥ ४॥

भव्यस्वरूपो भवदुःखतूलसङ्घाग्निचर्यः सुखधैर्यशाली ।
समस्तदुष्टग्रहनिग्रहेशो दुरत्ययोपप्लवसिन्धुसेतुः ॥ ५॥

निरस्तदोषो निरवद्यवेषः प्रत्यर्थिमूकत्वनिदानभाषः ।
विद्वत्परिज्ञेयमहाविशेषो वाग्वैखरीनिर्जितभव्यशेषः ॥ ६॥

सन्तानसम्पत्परिशुद्ध भक्तिविज्ञानवाग्देहसुपाटवादीन्ग् ।
दत्वा शरीरोत्थसमस्तदोषान् हत्वा स नोव्यात्ग् गुरुराघवेन्द्रः ॥ ७॥

यत्पादोदकसञ्चयः सुरनदीमुख्यापगासादिता-

सञ्ज्ञानुत्तमपुण्यसङ्घविलसत्प्रख्यातपुण्यावहः ।
दुस्तापत्रयनाशनो भुवि महावन्ध्यासुपुत्रप्रदो
व्यङ्गस्वङ्गसमृद्धिदो ग्रहमहापापापहस्तं श्रये ॥ ८॥

यत्पादकञ्जरजसा परिभूषिताङ्गा
यत्पादपद्ममधुपायितमानसा ये ।
यत्पादपद्मपरिकीर्तनजीर्णवाचः
तद्दर्शनं दुरितकाननदावभूतम् ॥ ९॥

सर्वतन्त्रस्वतन्त्रोसौ श्रीमध्वमतवर्धनः ।
विजयीन्द्रकराब्जोत्थ सुधीन्द्र वरपुत्रकः ॥ १०॥

श्रीराघवेन्द्रो यतिराट् गुरुर्मे स्याद्भयापहः ।
ज्ञानभक्तिसुपुत्रा युर्यशः श्रीपुण्यवर्धनः ॥ ११॥

प्रतिवादिजयस्वान्तभेदचिह्नादरो गुरुः ।
सर्वविद्याप्रवीणोन्यो राघवेन्द्रान् न विद्यते ॥ १२॥

अपरोक्षीकृतश्रीशः समुपेक्षित भावजः ।
अपेक्षितप्रदातान्यो राघवेन्द्रान् न विद्यते ॥ १३॥

दयादाक्षिण्यवैराग्यवाक्पाटवमुखाङ्कितः ।
शापानुग्रहशक्तोन्यो राघवेन्द्रान् न विद्यते ॥ १४॥

अज्ञानविस्मृतिर्भ्रान्तिसंशयापस्मृतिक्षयाः ।
तन्द्राकम्पवचः कौण्ठ्यमुखा ये चेन्द्रियोद्भवाः ।
दोषास्ते नाशमायान्ति राघवेन्द्र प्रसादतः ॥ १५॥

“श्रीराघवेन्द्राय नमः” इत्यष्टाक्षरमन्त्रतः ।
जपिताद्भावितान्ना् नित्यं इष्टार्था स्युर्न संशयः ॥ १६॥

हन्तु नः कायजान् दोषान्ना् आत्मात्मीयसमुद्भवान् ।
सर्वानपि पुमर्थांश्च ददातु गुरुरात्मवित् ॥ १७॥

इति कालत्रये नित्यं प्रार्थनां यः करोति सः ।
इहामुत्राप्तसर्वेष्टो मोदते नात्र संशयः ॥ १८॥

अगम्यमहिमा लोके राघवेन्द्रो महायशाः ।
श्रीमध्वमतदुग्धाब्धिचन्द्रोवतु सदानघः ॥ १९॥

सर्वयात्राफलावाप्त्यै यथाशक्ति प्रदक्षिणम् ।
करोमि तव सिद्धस्य वृन्दावनगतं जलम् ।
शिरसा धारयाम्यद्य सर्वतीर्थफलाप्तये ॥ २०॥

सर्वाभीष्टार्थसिद्ध्यर्थं नमस्कारं करोम्यहम् ।
तव सङ्कीर्तनं वेदशास्त्रार्थज्ञानसिद्धये ॥ २१॥

संसारेक्षयसागरे प्रकृतितोगाधे सदा दुस्तरे
सर्वावद्यजलग्रहैरनुपमैः कामादिभङ्गाकुले ।
नानाविभ्रमदुर्भ्रमेमितभयस्तोमाधिघेनोत्कटे
दुःखोत्कृष्टविषे समुद्धर गुरो मां मग्नरूपं सदा ॥ २२॥

राघवेन्द्र गुरुस्तोत्रं यः पठेत् भक्तिपूर्वकम्ग् ।
तस्य कुष्ठादिरोगाणां निवृत्तिःः त्वरया भवेत् ॥ २३॥

अन्धोऽपि दिव्यदृष्टिः स्याद् एडमूकोऽपि वाक्पतिः ।
पूर्णायुः पूर्णसम्पत्तिः स्तोत्रस्यास्य जपाद्भवेत् ॥ २४॥

यः पिबेज्जलमेतेन स्तोत्रेणैवाभिमन्त्रितम् ।
तस्य कुक्षगता दोषाः सर्वे नश्यन्ति तत् क्षणात्ग् ॥ २५॥

यद्वृन्दावनमासाद्य पङ्गुः खञ्जोऽपि वा जनः ।
स्तोत्रेणानेन यः कुर्यात् प्रदक्षिणनमस्क्रती ।
स जङ्घालो भवेदेव गुरुराजप्रसादतः ॥ २६॥

सोमसूर्योपरागे च पुष्यार्कादिसमागमे ।
योनुत्तममिदं स्तोत्रं अष्टोत्तरशतं जपेत् ।
भूतप्रेतपिशाचादि पीडा तस्य न जायते ॥ २७॥

एतत् स्तोत्रं समुच्चार्य गुरोर्वृन्दावनान्तिके ।
दीपसंयोजनात् ज्ञानं पुत्र लाभो भवेद्ध्रुवम्ग् ॥ २८॥

परवादि जयो दिव्य ज्ञानभक्त्यादि वर्धनम् ।
सर्वाभीष्टप्रवृद्धिः स्यान्नात्र कार्या विचारणा ॥ २९॥

राजचोरमहाव्याघ्रसर्पनक्रादिपीडनम् ।
न जायतेस्य स्तोत्रस्य प्रभावान् नात्र संशयः ॥ ३०॥

यो भक्त्या गुरुराघवेन्द्रचरणद्वन्द्वं स्मरन् यः पठेत्ग्

स्तोत्रं दिव्यमिदं सदा न हि भवेत् तस्या सुखं किञ्चन ।
किं त्विष्टार्थसमृद्धिरेव कमलानाथप्रसादो दयात्
कीर्तिर्दिग्विदिता विभूतिरतुला “साक्षीहयास्तोत्र हि” ॥ ३१॥

इति श्रीराघवेन्द्रार्यगुरुराजप्रसादतः ।
कृतं स्तोत्रमिदं पुण्यं श्रीमद्भिर्ह्यप्पणाभिध्यः ॥ ३२॥

पूज्याय राघवेन्द्राय सत्यधर्मरताय च ।
भजतां कल्पवृक्षाय नमतां कामधेनवे ॥ ३३॥

दुर्वादिध्वान्तरवये वैष्णवेन्दीवरेन्दवे ।
श्रीराघवेन्द्रगुरवे नमोत्यन्त दयालवे ॥ ३४॥

इति श्रीअप्पणाचार्यविरचितं श्रीराघवेन्द्रगुरुस्तोत्रं सम्पूर्णम् ।

Encoded and proofread by Krishnananda Achar

---

*Shri Raghavendraguru Stotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*